शुकाङ्घ्रा पूर्व्ववच्छ्रेया निर्गमोच्छ्रायकं भवेत् ॥
मण्डपे मानमेतत्तु स्वरूपञ्चापरं वदे । * ।
त्रैवेदं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः ॥
इत्थं क्षतेन मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भन्तु द्विगुणं कुर्य्यात् नेम्या मानं भवेदिह ।
स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः ॥ * ॥
प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च नामतः ।
वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः ॥
त्रिपिष्टपञ्च पञ्चैते प्रासादाः सर्व्वयोनयः ।
प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः ॥
वृत्तो वृत्तायतश्चान्योऽष्टास्रश्चेह च पञ्चमः ।
एतेभ्य एव सम्भूताः प्रासादाः सुमनोहराः ॥
सर्व्वप्रकृतिभूतेभ्यश्चत्वारिंशच्च एव च ।
मेरुश्च मन्दरश्चैव विमानश्च तथापरः ॥
भद्रकः सर्व्वतोभद्रो रुचको नन्दनस्तथा ।
नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवेत्यमी ॥
चतुरस्रात् समुद्भूता वैराजादिति गम्यताम् । * ।
वडभी गृहराजश्च शालागृहञ्च मन्दिरम् ॥
विमानञ्च तथा ब्रह्ममन्दिरं भवनं तथा ।
उत्तम्भं शिविका वेश्म नवैते पुष्पकोद्भवाः ॥ * ॥
वलयो दुन्दुभिः पद्मो महापद्मस्तथापरः ।
भद्रकः सर्व्वतोभद्रो रुचको नन्दनस्तथा ॥
गुवाटश्चस्तयान्यश्च वृत्ताः कैलाससम्भवाः । * ।
गजोऽथ वृषभो हंसो गरुड़ः सिंहनामकः ॥
भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः ।
वृत्तायतः समुद्भूतो नवैते मालकाह्वयात् ॥ * ॥
वज्रं चक्रं तथान्यच्च मुष्टिकं बभ्रुसंज्ञितम् ।
वक्रः स्वस्तिकखड्गौ च गदा श्रीवृक्ष एव च ॥
विजयो नामतः श्वेतस्त्रिपिष्टपसमुद्भवाः । * ।
त्रिकोणपद्ममर्द्धेन्दु चतुष्कोणं द्विरष्टकम् ॥
यत्र तत्र विधातव्यं संस्थानं मण्डपस्य तु ।
राज्यञ्च विजयञ्चैवमायुर्व्वर्द्धनमेव च ॥
पुत्त्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् ॥ * ॥
कुर्य्यात् ध्वजादिसंख्यां वा द्वारि गर्भगृहन्तथा ।
मण्डपः समसंख्याभिर्भूषितः सूत्रतस्तथा ।
मण्डपस्य चतुर्थांशाद्भद्रः कार्य्यो विजानता ॥
सगवाक्षकोपेतो निर्गवाक्षोऽथवा भवेत् ।
सार्द्धभित्तिप्रमाणेन भित्तिमानेन वा पुनः ॥
भित्तेर्द्वैगुण्यतो वापि कर्त्तव्या मण्डपाः क्वचित् ।
प्रासादे मञ्जरी कार्य्या चित्रा विषमभूमिका ॥
परिमाणविरोधेन रेखा वैषम्यभूमिका ।
आधारस्तु चतुर्द्वारश्चतुर्मण्डपशोभितः ॥
शतशृङ्गसमायुक्तो मेरुप्रासाद उत्तमः ।
मण्डपास्तस्य कर्त्तव्या भद्रैस्त्रिभिरलङ्कृताः ॥
घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये ।
कियन्तो येषु साधारा निराधाराश्च केचन ॥
प्रतिच्छन्दकभेदेन प्रासादाः सम्भवन्ति ते ।
अन्योन्यसङ्कराल्लेषां घटना नाम भेदतः ॥
देवतानां विशेषाय प्रासादा बहवः स्मृताः ।
प्रासादे नियमो नास्ति देवतानां स्वयम्भुवाम् ॥
तान्येव देवतानाञ्च पूर्व्वमानेन कारयेत् ।
चतुरस्रायतास्तत्र चतुष्कोणसमन्विताः ॥
चन्द्रशालान्विताः कार्य्या भेरीशिखरसंयुताः ।
पुरतो वाहनानाञ्च कर्त्तव्या लघुमण्डपाः ॥
नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया ।
प्रासादा देवतानाञ्च कार्य्या दिक्षु विदिक्ष्वपि ॥
द्वारपालाश्च कर्त्तव्या मुख्या गत्वा पृथक् पृथक् ।
किञ्चिद्विदूरतः कार्य्या मठास्तत्रोपजीविनाम् ॥
प्रावृता जगती कार्य्या फलपुष्पजलान्विता ।
प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेन्नरः ॥
वासुदेवं सर्व्वदेवान् सर्व्वभाक् तद्गृहादिकृत् ॥”
इति गारुडे प्रासादकीर्त्तनं नाम ४७ अध्यायः ॥
(यथाच ।
“एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ।
अथान्यच्च प्रवक्ष्यामि प्रासादं लिङ्गमानतः ॥
लिङ्गपूजाप्रमाणेन कर्त्तव्या पीठिका बुधैः ।
पीठिकार्द्धेन भागः स्यात्तन्मानेन तु भित्तयः ॥
बाह्यभित्ति प्रमाणेन उत्सेधस्तु भवेत्ततः ।
भित्त्युच्छ्रायात्तु द्विगुणः शिखरस्य समुच्छ्रयः ॥
शिखरस्य चतुर्भागा कर्त्तव्या स्यात् प्रदक्षिणा ।
प्रदक्षिणायास्तु समस्त्वग्रतो मण्डपो भवेत् ॥
तस्य चार्द्धेन कर्त्तव्यस्त्वग्रतो मुखमण्डपः ।
प्रासादान्निर्गतौ कार्य्यौ कपोतौ गर्भमानतः ॥
ऊर्द्धभित्त्युच्छ्रयात्तस्य मञ्जरीं तु प्रकल्पयेत् ।
मञ्जर्य्याश्चार्द्धभागेन शुकनासं प्रकल्पयेत् ॥
ऊर्द्धं तथार्द्धभागेन वेदिबन्धो भवेदिह ।
वेद्याश्चोपरि यच्छेषं कण्ठमामलसारकम् ॥
एवं विभज्य प्रासादं शोभनं कारयेद्बुधः ।
अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥
गर्भमानेन प्रासादप्रमाणं शृणुत द्विजाः ।
विभज्य नवधा गर्भं मध्ये लिङ्गस्य पीठिका ॥
पादाष्टकञ्च रुचिरं पार्श्वतः परिकल्पयेत् ।
मानेनानेन विस्तारो भित्तीनान्तु विधीयते ॥
पादे पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ।
स एव शिखरस्यापि द्विगुणः स्यात् समुच्छ्रयः ॥
चतुर्धा शिखरं भज्य अर्द्धभागद्वयस्य वा ।
शुकनासं प्रकुर्व्वीत तृतीये वेदिका मता ॥
कण्ठमामलसारन्तु चतुर्थे परिकल्पयेत् ।
कपोलयोस्तु संहारो द्विगुणोऽस्य विधीयते ॥
शोभनैश्च प्रवल्लीभिरण्डकैश्च विभूषितः ।
प्रासादेषु तृतीयस्तु मया तुभ्यं निवेदितः ॥
सामान्यमपरं तद्वत् प्रासादं शृणुत द्विजाः ।
त्रैवेदं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः ॥
इत्थं कृत्वा तु मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भन्तु द्विगुणं कुर्य्यान्नेमिमानं भवेदिह ।
स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः ॥
प्राग्ग्रीवपञ्चभागेन निष्क्रामस्तस्य चोच्यते ।
कारयेच्छिखरं तद्वत् प्राकारस्य विधानतः ॥
प्राग्ग्रीवं तस्य मानेन निष्क्रामेण विशेषतः ।
कुर्य्याद्द्वयञ्च भागेन प्राग्ग्रीवं कर्णमूलतः ॥
कारयेत् कनकं तत्र गर्भान्ते द्वारमूलतः ।
एवन्तु त्रिविधं कुर्य्यात् ज्येष्ठमध्यकनीयसम् ॥
लिङ्गमानात्तु भेदेन रूपभेदेन वा पुनः ।
एते सामान्यतः प्रोक्ता नामतः शृणुताधुना ॥
मेरुमन्दरकैलाशकुम्भसिंहगजास्तथा ।
विमानच्छन्दकस्तद्वच्चतुरस्रस्तथैव च ॥
अष्टास्रः षोड़शास्रश्च वर्त्तुलः सर्व्वभद्रकः ।
वलभी नन्दनश्चैव नन्दिवर्द्धन एव च ॥
सिंहो वृषः सुपर्णश्च पद्मकोऽथ समुद्रकः ।
प्रासादानां मतः प्रोक्तो विभागं शृणुत द्विजाः ॥
शतशृङ्गश्चतुर्द्वारो भूमिकाषोड़शोच्छ्रितः ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश प्रोक्तः कैलासो नवभूमिकः ।
विमानच्छन्दकस्तद्वदनेकशिखराततः ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः ।
विंशाण्डकसमायुक्तो नन्दनः समुदाहृतः ॥
षोड़शाण्डकसंयुक्तो नानारूपसमन्वितः ।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥
चन्द्रशालासमापेतो विज्ञेयः पञ्चभूमिकः ।
वलभीच्छन्दकस्तद्वच्छुकनासत्रयान्वितः ॥
वृषस्योच्छ्रायतस्तुल्यो मण्डलश्च शिवर्ज्जितः ।
सिंहः सिंहगतिर्ज्ञेयो गजो गजसमस्तथा ॥
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ।
अङ्गुलीपुटसंस्थानपञ्चाण्डकविभूषितः ॥
षोड़शास्रः समन्तात्तु विज्ञेयः स समुद्रकः ।
पार्श्वयोश्चन्द्रशालास्य उच्छ्रयो भूमिकाद्वयम् ॥
तथैकपद्मकः प्रोक्तः उच्छ्रयो भूमिकात्रयम् ।
षोड़शास्रः स विज्ञेयो विचित्रशिखरः शुभः ॥
मृगराजस्तु विख्यातः चन्द्रशालाविभूषितः ।
प्राग्ग्रीवेण विशालेन भूमिका स षडुत्तमाः ॥
अनेकचन्द्रशालस्तु गजप्रासाद उच्यते ।
पर्य्यन्तगृहराजो वै गरुड़ो नामनामतः ॥
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वितः ।
भूमिकास्तु षड़शीतिर्व्वाह्यतः सर्व्वतो भवेत् ॥
तथान्यो गरुड़स्तद्वदुच्छ्रायो दशभूमिकः ।
पद्मकः षोड़शास्रस्तु भूमिद्वयमथाधिकः ॥
पद्मतुल्यप्रमाणेन श्रीतुङ्गक इति स्मृतः ।
पञ्चाण्डकस्त्रिभूमिस्तु गर्भे हस्तचतुष्टयः ॥
वृषो भवति नाम्ना यः प्रासादः सार्व्वकामिकः ।
सप्तकाः पञ्चकाश्चैव प्रासादा ये मयोदिताः ॥
सिंहस्य ते समा ज्ञेया ये चान्येऽप्यतुप्रमाणतः ।
चन्द्रशालैः समोपेताः सर्व्वे प्राग्ग्रीवसंयुताः ॥
ऐष्टिका दारवाश्चैव शैलजाश्च सतोरणाः ।
मेरुश्च शतहस्तः स्यान्मन्दरः पञ्चहीनकः ॥
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानकः ।
नन्दिवर्द्धनकस्तद्वद्द्वात्रिंशत् समुदाहृतः ॥
त्रिंशद्भिर्नन्दनः प्रोक्तः सर्व्वतोभद्रकस्तथा ।
एते षोड़शहस्ताः स्युश्चत्वारो देववल्लभाः ॥
कैलासो मृगराजस्तु विमानच्छन्दको गजः ।
एते द्वादशहस्ताः स्युरेतेषां सिंहनादकः ॥
गरुड़ोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ।
एवमेव प्रमाणेन कर्त्तव्याः शुभलक्षणाः ॥
षट्कराष्टगनागानां माष्टहस्तः प्रशस्यते ।
तथा मेर्व्वादयः सप्त ज्येष्ठलिङ्गाः शुभावहाः ।